दिनाङ्क :- 19.05.2026

प्रात: - 06:55

## प्रधानमन्त्री-सामान्य-व्यापार-शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी ओस्लो नगरे भारत-नार्वे व्यापार अनुसंधान शिखरसम्मेलने भागम् अगृह्णात्। शिखरसम्मेलने युवराजः हकोन्, नार्वे-देशस्य प्रधानमन्त्री जोनास् गहर् स्टोरे च भागम् अगृह्णताम्। शिखरसम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी टीईपीए इत्यस्य व्यापार-आर्थिकसहभागित्वसमवाये प्रवेशम् इति विषये द्वैपाक्षिकव्यापारस्य निवेशस्य च वृद्धेः प्रशंसाम् अकरोत्। टी. ई. पी. ए. इत्यस्य अन्तर्गतं शतं बिलियन् यू. एस्. डालर् इत्यस्य निवेशलक्ष्यं साधयितुं उभयपक्षयोः हितधारकाः प्रयतन्ते इति सः अधोरेखितवान्, परिणामतः भारते दशलक्षाः उद्योगाः कल्पिताः भवेयुः इति मन्यते। सः भारतस्य प्रबलं ऊर्ध्वगामी-विकास-पथं, जनसाङ्ख्यिकीय-लाभांशं, प्रतिभाशालिनः महत्त्वाकांक्षायुक्ताः च युवकाः, दृढव्यवसाय-अभ्यासाः, निवेशक-अनुकूल-विनियामक-संरचना, प्रतिस्पर्धात्मकसङ्घवादस्य भावं च अधोरेखितवान्। सः भारते नील-अर्थव्यवस्था, नौकायान-निर्माणम्, हरित-परिवर्तनम्, पुनर्नवीकरणीय-ऊर्जा, स्वास्थ्य-तन्त्रज्ञानं, महत्त्वपूर्णानि खनिजानि, नवोद्योगादिषु प्रमुखक्षेत्रेषु नार्वे-देशस्य अधिक-निवेशम् प्रोत्साहितवान्। शिखरसम्मेलने भारतीयानां नार्वे-देशस्य च उद्योग-विशेषाणां संस्थानां च मध्ये अनेकाः व्यापार-सन्धयः हस्ताक्षरिताः।

राजनाथ्-हनोयी-प्रतिनिधय :

रक्षामंत्री राजनाथसिंहः आपरेशन् सिन्दूर् इतीदं भारतस्य सुदृढस्य, आत्मविश्वासयुक्तस्य, समर्थ राष्ट्ररूपेण च परिवर्तनस्य प्रमाणम् इति वर्णितवान्। ह्यः हनोय्-नगरे भारतीय-प्रवासिनः सम्बोधयन्, श्री सिङ्घ्-वर्यः दृढरूपेण अवदत् यत्, यद्यपि भारतं प्रथम-उपयोग-निषेध-नीतिं प्रति प्रतिबद्धः अस्ति, तथापि सः परमाणु-भीत्या वशीभूतः न भविष्यति, तथा च शत्रोः कस्यापि दुस्साहसस्य दृढतया प्रतिकारं कर्तुं सज्जः अस्ति। सः प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे प्राप्तायाः अभूतपूर्वस्य प्रगत्याः कारणात् अन्ताराष्ट्रियस्तरे भारतस्य वर्धमानम् औन्नत्यं उद्घाटितवान्।

नाडा-द्विपक्षीयसम्मेलनम्

केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री जगत्-प्रकाश्-नड्डाः, थाईलैंड्, इरान्, नीदरलैंड्स्, स्वीडन्, मॉरिशस्-देशानां प्रतिनिधिभिः समकक्षैः च सह उच्च-स्तरीय-द्वैपाक्षिक-मेलनं कृतवान्। जिनेवा-नगरे एषा सभा अभवत्। सामाजिक प्रसार माध्यमे - श्री नड्डाः अवदत् यत्, चर्चासु डिजिटल-स्वास्थ्यं, औषधनिर्माणं, सार्वजनिक-स्वास्थ्य-व्यवस्थाः, सार्वत्रिक-स्वास्थ्य-व्याप्तिम् च प्रवर्धयितुं सहकार्यं सुदृढं कर्तुं केन्द्रितम् आसीत् इति।

## बिर्ला-प्रतिवेदनम्

न्यायाधीशेन यशवन्तवर्मणा सम्बद्धानां आरोपाणां अन्वेषणं कुर्वती न्यायाधीशा-अन्वेषण-समितिः ह्यः लोकसभायाः अध्यक्षम् ओम् बिर्लां प्रति संसद-भवने स्वस्य प्रतिवेदनं समर्पितवती। प्रतिवेदनं यथाकाले संसदस्य उभयसभासु स्थापयिष्यते।

## इबोला-कोङ्गोः-

स्वास्थ्य-अधिकारिणः मन्यन्ते यत् कांगो-लोकतान्त्रिक-गणराज्ये इबोला-प्रकोपः कतिपयसप्ताह पूर्वं आरब्धः इति, अधुना मृतानां सङ्ख्या अष्टादशोत्तरैकशतम् यावत् संभूय इतोऽपि वर्धते इति।

## स्वर्ण सत्यतापरीक्षणम्

सर्वकारः अन्तर्जालमाध्यमेन प्रचलितं एतत् अभियोगं निष्कासयत् यत्

मन्दिरस्य स्वर्णसञ्चयस्य विनिमयरूपेण सर्वकारः देवालयानां कृते स्वर्ण-बन्धपत्राणि निर्गमिष्यति इति। प्रेस्-इन्फ़र्मेशन्-ब्यूरो इत्यस्य द-फैक्ट्-चेक्-यूनिट्, पी. आई. बी. इत्यनेन उक्तम् यत् एतत् प्रतिपादनम् मिथ्या अस्ति इति।

## आई.पी. एल.-

आई.पी. एल्. इति क्रिकेट्-क्रीडायां सन् राईजर्स हैदराबाद्-दलम् आतिथेय-चेन्नै-सूपर्-किङ्ग्स् इति दलम् गतरात्रौ पञ्च स्तोभैः पराजित्य प्ले-आफ़् इति स्थानं प्राप्तवत्। चेन्नै-सूपर्-किङ्ग्स् इत्यनेन निर्धारितस्य एकाशीत्यधिकैकशतम् लक्ष्यस्य

अनुसरणं कुर्वता सन् रैसर्स् हैदराबाद् इत्यनेन एकोनविंशतिः कन्दुकक्षेपणचक्रेषु एव लक्ष्यम् अतिक्रमितम्।